**Series JBB/C** **SET-4**

कोड नं.
Code No. **52/C**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) | Please check that this question paper contains **19** printed pages. |
| (II) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (II) | Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (III) | Please check that this question paper contains **18** questions. |
| (IV) | कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें । | (IV) | Please write down the Serial Number of the question in the answer-book before attempting it. |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम्

# SANSKRIT

*अवधिः : होरात्रयम्* *पूर्णाङ्काः : 80*
*निर्धारित समय : 3 घण्टे* *अधिकतम अंक : 80*
*Time allowed : 3 hours* *Maximum Marks : 80*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) | 10 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 25 अङ्काः |
| SECTION C : | Applied Grammar | |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | |

***निर्देशाः :***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में चार खण्ड हैं ।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*
*Answer all the questions in* ***Sanskrit****.*

## खण्डः 'क' (SECTION A)

## अपठितांश-अवबोधनम् (अपठितांश-अवबोधन)

**Unseen Reading Comprehension** 10 अङ्काः

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following prose passage and write the answer of the given questions in Sanskrit. *10*

विशाखदत्त: काश्मीरराज्यं परिपालयन् आसीत् । स: नितरां दानशील: आसीत् । किन्तु राज्यस्य य: आयभाग: अस्ति, तस्य अधिकाशं धनं दानार्थम् एव व्ययीक्रियते इति । तस्य मन्त्रिणे तत् इष्टम् न भवति स्म । अत: स: चिन्तितवान् यत् एतद्विषये राजा विशाखदत्त: निवेदनीय: इति । परं तदैव निर्धनकुलोत्पन्ना काचित् युवति: राज्ञ: विशाखदत्तस्य समीपम् आगत्य अवदत् — "महाप्रभो! वर्षद्वयात् पूर्वं प्रवृत्ते कस्मिंश्चित् अपघाते मम पति: दिवङ्गत: । तस्मात् आश्रयरहिता अभवम् अहम् । मम एकमात्रं पुत्र: य: अस्ति स: अपि तीव्र ज्वरेण पीडित: अस्ति । तस्य चिकित्सार्थं कृपया भवान् धनसाहाय्यं करोतु, येन भवत: उपकारं सदा स्मरेयम् अहम्" इति । पुनश्च सगद्गदं सा अश्रूणि स्रावितवती । तस्या: दीनवचनं श्रुतवत: विशाखदत्तस्य हृदये करुणा उत्पन्ना जाता । स: तस्यै शतं रूप्यकाणि दत्त्वा तां प्रेषितवान् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *1×2=2*

(i) विशाखदत्त: किं परिपालयन् आसीत् ?

(ii) नितरां दानशील: क: आसीत् ?

(iii) विशाखदत्त: युवत्यै कति रूप्यकाणि दत्त्वा तां प्रेषितवान् ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) युवत्या: दीनवचनं श्रुतवत: विशाखदत्तस्य हृदये का उत्पन्ना जाता ?

(ii) युवत्या: पुत्र: केन पीडित: आसीत् ?

(iii) राज्ञ: विशाखदत्तस्य समीपम् आगत्य युवति: स्वपत्यु: विषये किम् अवदत् ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. *1*

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए । (केवल तीन प्रश्न)

Answer according to instructions. (Only three questions) *1×3=3*

(i) 'प्रेषितवान्' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) ताम्

(ख) सः

(ग) तस्यै

(ii) 'राजा विशाखदत्तः' अनयोः पदयोः विशेषणं किम् ?

(क) राजा

(ख) प्रजा

(ग) विशाखदत्तः

(iii) 'अर्थम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) धनम्

(ख) पुष्पम्

(ग) पत्रम्

(iv) अनुच्छेदे 'अपकारम्' पदस्य कः विपर्ययः आगतः ?

(क) धनसाहाय्यम्

(ख) उपकारम्

(ग) एकमात्रम्

## खण्डः 'ख' (SECTION B)

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills

15 अङ्काः

**2.** प्रधानाचार्य प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लिखत ।

प्रधानाचार्य को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए ।

Complete the following letter written to your Principal, with the help of the words given in the box and rewrite the same. $\frac{1}{2}\times10=5$

(i) ____________

प्रधानाचार्यः,

राजकीय उच्चविद्यालय:, तिरुपति: ।

(ii) ____________ !

सविनयं निवेदनम् अस्ति यत् (iii) ____________ पिता सर्वकारे एक: चतुर्थश्रेणी (iv) ____________ अस्ति । तस्य मासिक-आय: अतीव (v) ____________ अस्ति । येन परिवारस्य (vi) ____________ काठिन्येन भवति । मम परिवारे माता, पिता (vii) ____________ भ्रातरौ एका भगिनी इति (viii) ____________ सदस्या: सन्ति । अत: अहं भवन्तम् (ix) ____________ यत् मम विकासादिशुल्कं क्षमापयतु ।

भवदीय: (x) ____________

आलोक:

कक्षा दशमी अ ।

दिनाङ्क: ____________

**मञ्जूषा**

| |
|---|
| शिष्य:, न्यून:, द्वौ, सेवायाम्, मम, निवेदयामि, कर्मचारी, निर्वाह:, महोदय, पञ्च । |

**3.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत ।
नीचे दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में वर्णन कीजिए ।
Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. *1×5=5*




**मञ्जूषा**

| |
|---|
| उद्याने, वृक्षाः, बालकाः, प्रशिक्षकः, बालिकाः, परस्परं, पादकन्दुकेन, शिक्षणं, क्रीडन्ति, श्वेतवस्त्राणि, श्यामवस्त्राणि, ददाति, विद्यालयः, समीपे, क्रीडाक्षेत्रे । |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।
Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. *1×5=5*

**'पर्यावरण-प्रदूषणम्'**

**मञ्जूषा**

| |
|---|
| पर्यावरणम्, वायुमण्डलम्, दूषयति, प्राकृतिकं, सन्तुलनम्, वायु-प्रदूषणम्, जल-प्रदूषणम्, भवन्ति, ध्वनि-प्रदूषणम्, उपस्थापयति, सङ्कटम्, स्वास्थ्यं, रोगाः, संरक्षणम्, वृक्षाः, वनस्पतिः । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत । (केवलं वाक्यपञ्चकम्)
निम्नलिखित वाक्यों को संस्कृत भाषा में अनुवाद करके लिखिए । (केवल पाँच वाक्य)
Translate into Sanskrit and write the following sentences.
(Only five sentences) *1×5=5*

(i) श्यामा फल खाती है ।
Shyama eats fruits.

(ii) हम सब पुस्तक पढ़ते हैं ।
We all read a book.

(iii) कल विद्यालय में परीक्षा होगी ।
The examination will be conducted in the school tomorrow.

(iv) कल उमा कहाँ थी ?
Where was Uma yesterday ?

(v) तुम दोनों पढ़ो ।
Both of you read.

(vi) आकाश से वर्षा होती है ।
The rain comes from the sky.

(vii) क्या मैं मेला जाऊँ ?
May I go to the fair ?

## खण्डः 'ग' (SECTION C)
## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)
## Applied Grammar
25 अङ्काः

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत ।
(केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए ।
(केवल चार प्रश्न)
Write the underlined words of the following sentences after joining or disjoining Sandhis. (Only four questions) *1×4=4*

(i) ग्रीष्मे पथिका: <u>वृक्षच्छायां</u> सेवन्ते ।

(ii) <u>समक्षं वर्तमान:</u> शिष्य: आज्ञाकारी अस्ति ।

(iii) हे मित्र ! <u>नम: + ते</u> ।

(iv) हे सोमदेव ! <u>सत् + मार्गे</u> गच्छ ।

(v) <u>कविरपि</u> पुराणो व्रतिनिधि: ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।

(केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए । (केवल चार प्रश्न)

Choose and write the correct compound or expounded forms of the underlined words of the following sentences. (Only four questions) *1×4=4*

(i) तदैव कृष्णवर्ण: उड्डीय आगत: ।

(क) कृष्ण: वर्ण: यस्य स:

(ख) कृष्णम् वर्णम् यस्या: सा

(ग) कृष्ण: च वर्ण: च

(ii) मुनि: राजानं यथेष्टम् अभ्यनन्दत् ।

(क) इष्टेन अनतिक्रम्य

(ख) इष्टाय अनतिक्रम्य

(ग) इष्टम् अनतिक्रम्य

(iii) राम: लवं च कुशं च उपवेशयितुम् कथयति ।

(क) लवकुशौ

(ख) लवकुशम्

(ग) लवकुशे

(iv) स्नेहेन सहितम् प्रकृति: सर्वान् पालयति ।

(क) सहसास्नेहम्

(ख) सहस्नेहम्

(ग) सस्नेहं

(v) काचिदियम् व्याघ्रम् मारयति इति सा ।

(क) व्याघ्रमारी

(ख) व्याघ्रधारी

(ग) व्याघ्रमार:

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)

निम्नलिखित वाक्यों में रेखांकित पदों में प्रकृति-प्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों से चुनकर लिखिए । (केवल चार प्रश्न)

Write the underlined words of the following sentences after joining or disjoining suffixes to roots or words, selecting the correct answer from the options given below. (Only four questions) *1×4=4*

(i) स्थिर + त्व लाघवं मृजा ।

(क) स्थिरत्वता

(ख) स्थिरत्वम्

(ग) स्थिरत्वात्

(ii) पुत्रस्य पितरौ प्रति कृतज्ञता भवेत् ।

(क) कृतज्ञ + क्त

(ख) कृतज्ञ + मतुप्

(ग) कृतज्ञ + तल्

(iii) सर्वेषु अपत्येषु जननी वत्सल + टाप् ।

(क) वत्सला

(ख) वत्सल:

(ग) वत्सलम्

(iv) बुद्धि: बलवत् + ङीप् तन्वि ! सर्वकार्येषु सर्वदा ।

(क) बलवती

(ख) बलावती

(ग) बलीवती

(v) अद्य वार्षिक: परीक्षापरिणाम: प्राप्स्यते ।

(क) वर्ष + मतुप्

(ख) वर्ष + ठक्

(ग) वर्ष + तल्

**8.** मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत ।
मञ्जूषा में दिए गए शब्दों की सहायता से वाच्य परिवर्तन करते हुए निम्नलिखित संवाद को पुनः लिखिए ।
Rewrite the following dialogue changing the voice with the help of the words given in the box. *1×3=3*

*श्यामा* – रमे ! बहिः सेवकाः आगच्छन्ति ।

*रमा* – श्यामे ! किं (i) __________ मार्गः पृच्छ्यते ?

*श्यामा* – रमे ! आम्, ते मार्गम् (ii) __________ ।

*रमा* – श्यामे ! तैः (iii) __________ न याच्यते ।

**मञ्जूषा**

| |
|---|
| द्रव्यं, सेवकैः, पृच्छन्ति । |

**अथवा (OR)**

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत । (केवलं प्रश्नत्रयम्)
निम्नलिखित वाक्यों में वाच्य-परिवर्तन कीजिए । (केवल तीन प्रश्न)
Change the voice in the following sentences. (Only three questions) *1×3=3*

(i) महेशः पुस्तकं पठति ।

(ii) नवीनः वार्तां शृणोति ।

(iii) भृत्यैः भारः उह्यते ।

(iv) त्वं पत्रं लिखसि ।

(v) मेघैः जलम् वृष्यते ।

**9.** अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत । (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित दिनचर्या में रिक्त स्थानों की पूर्ति कालबोधक शब्दों से कीजिए ।
(केवल चार प्रश्न)
Rewrite the daily routine using words in place of figures.
(Only four questions) *1×4=4*

(i) सुधा सायं 6:00 __________ वादने क्रीडति ।

(ii) रमेशः प्रातः 9:30 __________ वादने विद्यालयं गच्छति ।

(iii) रेवती प्रातः 7:15 __________ वादने प्रातराशं करोति ।

(iv) गौरी सायं 5:30 __________ वादने भ्रमणाय गच्छति ।

(v) गणेशः रात्रौ 10:45 __________ वादने स्वपिति ।

**10.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तै: उचितै: अव्ययपदै: पूरयत ।
(केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए अव्यय पदों के द्वारा कीजिए ।
(केवल छः प्रश्न)

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. (Only six questions) $\frac{1}{2}\times 6=3$

(i) ____________ रामेश्वर: पुस्तकं पठितवान् ।

(ii) योगेन्द्र: ____________ प्रयागराजं गमिष्यति ।

(iii) त्वं ____________ समागतोऽसि ?

(iv) ____________ तु शैत्यं प्रतिभाति ।

(v) ____________ राम: पठति तदा सोहन: कोलाहलं करोति ।

(vi) ____________ अवकाश: अस्ति ।

(vii) तत्र उद्याने बाला: ____________ भ्रमन्ति ।

(viii) रामेण सह सीता ____________ वनं गतवती ।

**मञ्जूषा**

| |
|---|
| सम्प्रति, यदा, अद्य, ह्यः, कुतः, अपि, श्वः, इतस्ततः । |

**11.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्यः चित्वा लिखत ।
(केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं । शुद्ध पद विकल्प से चुनकर लिखिए ।
(केवल तीन प्रश्न)

Underlined words are incorrect in the following sentences. After selecting correct words from the options, write the same. (Only three questions)

$1\times 3=3$

(i) छात्रा: पाठं पठति । (पठत: / पठसि / पठन्ति)

(ii) मेधा ह्य: विद्यालयं न गच्छति । (अगच्छताम् / अगच्छत् / अगच्छन्)

(iii) वयम् श्व: आपणं गमिष्यसि । (गमिष्यन्ति / गमिष्यथ: / गमिष्याम:)

(iv) यूयं पठन्तु । (तौ / ते / त्वम्)

## खण्डः 'घ' (SECTION D)
## पठित-अवबोधनम् (पठित-अवबोधन)
## Reading Comprehension

30 अङ्काः

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following prose passage and answer the given questions in Sanskrit. *5*

विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत । चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौर आसीत् । तत्क्षणमेव रक्षापुरुषः तम् अतिथिं 'चौरोऽयम्' इति प्रख्याप्य कारागृहे प्राक्षिपत् ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times2=1$

(i) वस्तुतः चौरः कः आसीत् ?

(ii) कीदृशी दैवगतिः ?

(iii) कः एकां मञ्जूषाम् आदाय पलायितः ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) *1×1=1*

(i) ग्रामवासिनः कं चौरं मत्वा अभर्त्सयन् ?

(ii) "चौरोऽयं चौरोऽयं" इति कः उच्चैः क्रोशितुमारभत ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) *1×3=3*

(i) 'अद्भुता' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) विचित्रम्

(ख) विचित्रा

(ग) परम्

(ii) 'अभर्त्सयन्' इति पदस्य कर्तृपदं किम् ?

(क) ग्रामवासिन:

(ख) विद्यार्थिन:

(ग) रक्षापुरुषा:

(iii) 'ग्रामवासिन:' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(क) कुशला:

(ख) ज्ञानिन:

(ग) प्रबुद्धा:

(iv) 'निर्गत:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) प्रबुद्ध:

(ख) प्रविष्ट:

(ग) निष्क्रम्य

**13.** अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित पद्य को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following poetry passage and answer the given questions in Sanskrit. *5*

मृगा मृगै: सङ्गमनुव्रजन्ति, गावश्च गोभि: तुरगास्तुरङ्गै: ।
मूर्खाश्च मूर्खै: सुधिय: सुधीभि:, समान-शील-व्यसनेषु सख्यम् ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times 2=1$

(i) तुरङ्गै: सह के अनुव्रजन्ति ?

(ii) मृगा: कै: सङ्गम् अनुव्रजन्ति ?

(iii) गोभि: सह का: अनुव्रजन्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) $1\times 1=1$

(i) केषु सख्यं भवति ?

(ii) सुधिय: संख्यं कै: सह भवति ?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) *1×3=3*

(i) 'मृगा:' इति कर्तृपदस्य क्रियापदं किम् ?
(क) अनुव्रजन्ति
(ख) व्रजन्ति
(ग) सङ्गम्

(ii) 'मित्रता' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(क) सङ्गम्
(ख) सख्यम्
(ग) समानम्

(iii) 'अश्वा:' इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तः ?
(क) तुरगा:
(ख) मृगा:
(ग) गाव:

(iv) 'विद्वांस:' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?
(क) मृगा:
(ख) मूर्खा:
(ग) सुधिय:

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।
निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।
Read the following drama passage and answer the given questions in Sanskrit. *5*

*काक:* – आम् सत्यं कथितं त्वया – वस्तुत: वनराज: भवितुं तु अहमेव योग्य: ।

*पिक:* – *(उपहसन्)* कथं त्वं योग्य: वनराज: भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि । न रूपम्, न ध्वनिरस्ति । कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

*काक:* – अरे ! अरे ! किं जल्पसि ? यदि अहं कृष्णवर्ण: तर्हि त्वं किं गौराङ्ग: ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा 'अनृतं वदसि चेत् काक: दशेत्' – इति प्रकारेण । अस्माकं परिश्रम: ऐक्यं च विश्वप्रथितम् । अपि च काकचेष्ट: विद्यार्थी एव आदर्शच्छात्र: मन्यते ।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $\frac{1}{2}\times2=1$

(i) 'वनराज: भवितुम् अहमेव योग्य:' इति क: कथयति ?

(ii) काकम् मेध्यामेध्यभक्षकं क: मन्यते ?

(iii) कीदृश: विद्यार्थी आदर्शच्छात्र: मन्यते ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल एक प्रश्न)
Answer in a complete sentence. (Only one question) *1×1=1*

(i) कस्य न रूपं न ध्वनि: अस्ति ?

(ii) काकस्य सत्यप्रियता जनानां कृते उदाहरणस्वरूपा कथं प्रसिद्धा अस्ति ?

(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose and write the appropriate answer from the given options. (Only three questions) *1×3=3*

(i) नाट्यांशे 'मन्यामहे' इति क्रियाया: कर्तृपदं किम् ?

(क) त्वाम्

(ख) वयम्

(ग) पिक:

(ii) 'योग्य: वनराज:' इत्यत्र विशेष्यपदं किम् ?

(क) योग्य:

(ख) वनराज:

(ग) राज:

(iii) नाट्यांशे 'कृष्णवर्ण:' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(क) श्वेतवर्ण:

(ख) रक्तवर्ण:

(ग) गौराङ्ग:

(iv) 'कोकिल:' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

(क) वनराज:

(ख) कृष्णवर्ण:

(ग) पिक:

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)
रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)
Frame the questions on the basis of underlined words.
(Only four questions) *1×4=4*

(i) त्वं मानुषात् बिभेषि ।

(ii) गात्राणां सुविभक्तता व्यायामेन संभवति ।

(iii) सहस्राधिकेषु पुत्रेषु सत्स्वपि सा दु:खी आसीत् ।

(iv) सर्वे प्रकृतिमातरं प्रणमन्ति ।

(v) चौरस्य पादध्वनिना अतिथि: प्रबुद्ध: ।

**16.** मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकयो: अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following two shlokas by choosing the appropriate words given in the box. $\frac{1}{2}\times 4=2$

I. वयोबलशरीराणि देशकालाशनानि च ।

समीक्ष्य कुर्याद् व्यायामन्यथा रोगमाप्नुयात् ।।

**अन्वय: –**

(जन:) वयोबलशरीराणि देशकाल – (i) _________ च (ii) _________ व्यायामम् कुर्यात् (iii) _________ रोगम् (iv) _________ ।

II. अपत्येषु च सर्वेषु जननी तुल्यवत्सला । $\frac{1}{2}\times 4=2$

पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत् ।।

**अन्वय: –**

जननी (i) _________ अपत्येषु च (ii) _________ (भवति) । सा माता (iii) _________ पुत्रे तु (iv) _________ भवेत् ।

**मञ्जूषा**

| |
|---|
| समीक्ष्य, आप्नुयात्, अशनानि, सर्वेषु, अन्यथा, कृपार्द्रहृदया, दीने, तुल्यवत्सला |

**अथवा (OR)**

मञ्जूषायाः साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत ।

मञ्जूषा की सहायता से श्लोक के भावार्थ में रिक्त स्थानों की पूर्ति करके पुनः लिखिए ।

Rewrite after filling the blanks in the meaning of Shlokas with the help of box. $1\times 4=4$

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

**भावार्थ: –**

पिता तु पुत्रस्य (i) _________ तस्मै श्रेष्ठं (ii) _________ प्रदातुं सदैव तत्पर: भवति । समर्थ: जात: पुत्र: यदा कथयति यत् 'पिता मम कृते तु महान्तम् (iii) _________ कृतवान्' इति तदैव तस्य पितरं प्रति (iv) _________ कथ्यते ।

**मञ्जूषा**

| |
|---|
| कृतज्ञता, श्रमम्, बाल्यकाले, विद्याधनम् । |

**17.** अधोलिखितं कथांशं समुचित-क्रमेण लिखत ।

निम्नलिखित कथांश को समुचित क्रम में लिखिए ।

Write in correct order, the following parts of the story. $\frac{1}{2} \times 8 = 4$

(i) तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जात: ।

(ii) कश्चन निर्धनो जन: भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ।

(iii) अर्थाभावेन पीडित: स बसयानं विहाय पदातिरेव प्राचलत् ।

(iv) पदातिक्रमेण संचलन् सायं समयेऽपि स: गन्तव्याद् दूरे आसीत् ।

(v) तस्य पुत्र: तत्रैव छात्रावासे निवसन् अध्ययने संलग्न: समभूत् ।

(vi) तत: स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागत: ।

(vii) एकदा पिता पुत्रस्य रुग्णतामाकर्ण्य तत्र तं द्रष्टुं प्रस्थित: ।

(viii) 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', इति स स्मृतवान् ।

**18.** 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति, तानि यथाक्रमेण समक्षं लिखत । (केवलं प्रश्नत्रयम्)

'क' स्तम्भ में लिखित पदों के पर्याय पद 'ख' स्तम्भ में लिखे गए हैं । उनको यथाक्रम से उनके समक्ष लिखिए । (केवल तीन प्रश्न)

Synonyms of the words of column 'Ka' have been given in column 'Kha'. Write in correct order in front of required words. (Only three questions) $1 \times 3 = 3$

| *क* | *ख* |
|---|---|
| रसालम् | मन्त्री |
| दशनै: | दशशतम् |
| सहस्रम् | आम्रम् |
| अमात्य: | दन्तै: |

**अथवा (OR)**

अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थान् चित्वा लिखत ।

(केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुसार उचित अर्थ को चुनकर लिखिए ।

(केवल तीन प्रश्न)

Write the appropriate meaning after choosing the underlined words of the following sentences. (Only three questions) *1×3=3*

(i) तस्य भार्या बुद्धिमती पितृगृहं प्रति चलिता ।

(क) भर्ता

(ख) पत्नी

(ग) जननी

(ii) व्रजति हिमकर: बालभावात् ।

(क) निशाकर:

(ख) दिवाकर:

(ग) भास्कर:

(iii) पिको वसन्तस्य गुणं न वायस: ।

(क) मयूर:

(ख) काक:

(ग) वक:

(iv) स एव वह्नि: दहते शरीरम् ।

(क) करी

(ख) वैरी

(ग) अग्नि: